# Brahmaproktam Jambudvipe Shivakshetravarnanam

# બ્રહ્માપ્રોક્તં જમ્બૂદ્વીપે શિવક્ષેત્રવર્ણનમ્

## Document Information

Text title : Brahmaproktam Jambudvipe Shivakshetravarnanam

File name : jambUdvIpeshivakShetravarNanambrahmAproktaM.itx

Category : shiva, shivarahasya, tIrthakShetra

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 15 | 127-154||

Latest update : April 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

April 28, 2024

*sanskritdocuments.org*

# બ્રહ્માપ્રોક્તં જમ્બૂદ્વીપે શિવક્ષેત્રવર્ણનમ્

કલિં પ્રાપ્ય મહાદેવં યોઽર્ચયિષ્યતિ સર્વદા ।
ન તસ્માદધિકો ધન્યઃ સત્યં સત્યં ન સંશયઃ ॥ ૧૩૪॥

યાવત્પુણ્યં કૃતયુગે શિવસ્યાભ્યર્ચનાદ્ભવેત્ ।
તતઃ શતગુણં પુણ્યં ત્રેતાયાં શિવપૂજનાત્ ॥ ૧૩૫॥

ત્રેતાયાં પૂજનાચ્છમ્ભોર્યાવત્પુણ્યમવાપ્યતે ।
તતોઽયુતગુણં પુણ્યં દ્વાપરે શિવપૂજનાત્ ॥ ૧૩૬॥

દ્વાપરે શિવપૂજાતો યાવત્પુણ્યમવાપ્યતે ।
તતઃ કોટિગુણં પુણ્યં કલૌ શઙ્કરપૂજય ॥ ૧૩૭॥

કલાવપિ મહાદ્વીપો જમ્બૂદ્વીપ ઇતિ શ્રુતઃ ।
તત્ર શઙ્કરમભ્યર્ચ્ય દુઃખં નાપ્નોતિ માનવઃ ॥ ૧૩૮॥

શ્વેતદ્વીપાદિષુ શ્રદ્ધાભક્ત્યા ચ શિવપૂજયા ।
યત્પુણ્યં તચ્છતગુણં જમ્બૂદ્વીપે શિવાર્ચનાત્ ॥ ૧૩૯॥

જમ્બૂદ્વીપે ચ સન્ત્યેવ શિવક્ષેત્રાણિ ભૂરિશઃ ।
તેષુ શઙ્કરમારાધ્ય લભ્યતે સુકૃતં બહુ ॥ ૧૪૦॥

જમ્બૂદ્વીપે શિવક્ષેત્રે કુમ્ભઘોણાભિધં મહત્ ।
તસ્મિન્ ક્ષેત્રે જન્મમાત્રાજ્જન્મ ન પ્રાપ્યતે પુનઃ ॥ ૧૪૧॥

તત્ર શઙ્કરમભ્યર્ચ્ય યાવત્પુણ્યમવાપ્યતે ।
તતઃ શતગુણં પુણ્યં શિવાર્ચાયાં ચિદમ્બરે ॥ ૧૪૨॥

ચિદમ્બરે શિવાર્ચાતો યાવત્પુણ્યમવાપ્યતે ।
તતઃ શતગુણં પુણ્યં શ્રીમદ્વૃદ્ધાચલેશ્વરે ॥ ૧૪૩॥

વૃદ્ધાચલે શિવાર્ચાતો યાવત્પુણ્યમવાપ્યતે ।
તતઃ શતગુણં પુણ્યં શિવાર્ચાતોઽનલેશ્વરે ॥ ૧૪૪॥

તતોઽપ્યત્યુત્તમં ક્ષેત્રમરુણાચલનામકમ્ ।
તતોઽયુતગુણં પુણ્યં તત્ર શઙ્કરપૂજયા ॥ ૧૪૫॥

તતોઽપ્યત્ત્યુત્તમં ક્ષેત્રં કાઞ્ચીક્ષેત્રં શિવાત્મકમ્ ।
તતોસ્યુતગુણં પુણ્યં તત્ર શઙ્કરપૂજયા ॥ ૧૪૬॥

તતો દક્ષિણકૈલાસઃ શિવપ્રિયકરો વરઃ ।
તતોઽયુતગુણં પુણ્યં તત્ર શઙ્કરપૂજયા ॥ ૧૪૭॥

તતઃ પુણ્યતરં ક્ષેત્રં શ્રીશૈલક્ષેત્રમુત્તમમ્ ।
તતોઽયુતગુણં પુણ્યં તત્ર શઙ્કરપૂજયા ॥ ૧૪૮॥

તતઃ શ્રેષ્ઠતરં ક્ષેત્રં કાશીક્ષેત્રં શિવાત્મકમ્ ।
તતઃ કોટિગુણં પુણ્યં તત્ર શઙ્કરપૂજયા ॥ ૧૪૯॥

તતઃ શ્રેષ્ઠતરં ક્ષેત્રં શ્રીમદન્તર્ગૃહાભિધમ્ ।
તતઃ કોટિગુણં પુણ્યં પ્રાપ્યં શઙ્કરપૂજયા ॥ ૧૫૦॥

તત્રાપ્યત્યુત્તમં ક્ષેત્રં જ્ઞાનવાપીતટં વરમ્ ।
તતઃ કોટિગુણં પુણ્યં પ્રાપ્યં શઙ્કરપૂજયા ॥ ૧૫૧॥

તત્રાપ્યત્યુત્તમં જ્ઞેયં વિલાસસ્થાનમૈશ્વરમ્ ।
તતઃ કોટિગુણં પુણ્યં પ્રાપ્યં શઙ્કરપૂજયા ॥ ૧૫૨॥

તત્રાપ્યત્યુત્તમં સ્થાનં સર્વદેવસ્તુતં સદા ।
શિવાગારમિતિ જ્ઞેયં તત્તુ સર્વોત્તમોત્તમમ્ ॥ ૧૫૩॥

તત્ર સામ્બો મહાદેવઃ સર્વદેવોત્તમોત્તમઃ ।
સર્વવેદસ્તુતો નિત્યં લિઙ્ગાકારેણ તિષ્ઠતિ ॥ ૧૫૪॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે બ્રહ્માપ્રોક્તં જમ્બૂદ્વીપે શિવક્ષેત્રવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૫ । ૧૨૭-૧૫૪॥

- .. shrIshivarahasyam ugrAkhyaH saptamAMshaH . adhyAyaH 15 . 127-154 ..

Notes:

While delivering the Upadeśa ઉપદેશ to Deva-s દેવાઃ, Brahmā બ્રહ્મા tells them about the merits of worshiping Śiva શિવ especially during KaliYuga કલિયુગ in comparison with the other three Yuga-s યુગાઃ (Kṛta કૃત, Tretā ત્રેતા and Dvāpara દ્વાપર).

He further enumerates select Śivakśetra શિવક્ષેત્ર of KaliYuga કલિયુગ that are manifest in the Jambūdvīpa જમ્બૂદ્વીપ, and the merits of worshiping Śiva શિવ there.
These Śivakśetra શિવક્ષેત્ર include: Kumbhaghoṇam કુમ્ભઘોણમ્ (Kumbhakoṇam કુમ્ભકોણમ્), Cidambaram ચિદમ્બરમ્, Vṛddhācaleśvaram વૃદ્ધાચલેશ્વરમ્, Aruṇācalam અરુણાચલમ્, Kāñcī કાઞ્ચી, Dakṣiṇa Kailāsa દક્ષિણ કૈલાસ, Śrīśailam શ્રીશૈલમ્, Kāśī કાશી, Śrīmadantargṛham શ્રીમદન્તર્ગૃહમ્, Jñānavāpitaṭam જ્ઞાનવાપિતટમ્, Vilāsasthānamaiśvaram વિલાસસ્થાનમૈશ્વરમ્, Śivāgāram શિવાગારમ્.

Encoded and proofread by Ruma Dewan

*Brahmaproktam Jambudvipe Shivakshetravarnanam*
pdf was typeset on April 28, 2024

Please send corrections to *sanskrit@cheerful.com*